No. १५८४

Title व्युत्पत्ति वाद टीका

Author x

Extent १० Age x

Subject न्याय वैशेषिक

व्युत्पत्तिवादटीका

पत्राणि ९०

१५८५

न्याय

वृ॰टी॰

चैत्रस्यद्रव्यमित्यादौसंबंधत्वेनस्वत्वंषष्ठ्यर्थःतस्यद्रव्येऽन्वयः तथाचचैत्रनिरूपितसंबंधविशिष्टंद्रव्यमितिबो
धःचैत्रस्यकारणमित्यादौसंबंधत्वेननिरूपितत्वंषष्ठ्यर्थः तस्यस्वपदार्थैकदेशेस्वत्वेऽन्वयः तथाचचैत्रसं
बंधित्वविशिष्टमित्यर्थः घटस्यकारणमित्यादौघटसंबंधिकारणत्वविशिष्टमितिबोधः ९१ अतएव
स्वत्वनिरूपितत्वावयवत्वादीनांसंबंधत्वेनषष्ठ्यर्थत्वादेव कृद्योगापिषष्ठी ज्ञोविदर्थस्यकरणे कृत्वोर्थप्र
योगेकालेधिकरणेइत्यादिसूत्रविहिताषष्ठीसंबंधत्वेनैवकरणत्वाधिकरणत्वादीन् बोधयतीत्यर्थः तस्य
फलंप्रतिपदविधानाषष्ठीनसमस्यतेइत्यनेनषष्ठीसमासनिषेधरूपमितिभावः ९१ इत्थमेव स्वत्वनि
रूपितत्वावयवत्वादीनांसंबंधत्वेनषष्ठ्यर्थत्वेएव अधीगर्थदयेशांकर्मणिइदंसूत्रंनियमार्थं कोवानि
यमः संबंधत्वेनकर्मत्वविवक्षायांअनेनषष्ठ्येवनतुसमासः अधीगर्थदयेशांकर्मणीदमफलत्वांक्ष
ज्ञःप्रतिपत्तेरित्याद्युक्तमन्यत्वरूपेणान्यार्थकंतथाच यदादमस्तत्रास्मत्वेनरूपेणान्यार्थकममपदंतद्यो
गेपंचमीयपटेकरस्तत्रास्मत्वेनरूपेणान्यार्थकमेकपदंनतद्योगेपंचमीनेतिभावः ९० अन्यथेति

अस्मपदस्य स्वरूपस्येरतेन योगे पकशब्दयोगे इत्यर्थः ९१ भिद्यते घट इत्यादिप्रयोगानुपपत्तेश्च अस्मो
स्माभावार्थकभिद्धातोरकर्मकतयायगात्मनेपदाप्राप्तेरितिभावः ९१ दिवादित्वम्भादिवदाकृतिग
णः तेनलीयतेमृग्यतीत्यादिसिद्धिरितिदिवादेराकृतिगणत्वाच्छिदिधातोरपिदैवादिकत्वात् श्यन् भ
विष्यतिइत्यतआह परस्मैपदित्वाच्चेति ९८ नकेवलंकर्तृता यथाभेदार्थकभिद्धातोस्तस्यलेइतिभावः
९१ केषांचिद्नवधानेन मणिकाराणामवधानंविशेषणत्वानंतदभावेनेत्यर्थः मणिकाराणांमते
यत्रव्याप्तिपक्षधर्मतायांयोज्यभेदप्रकारकानुमितिविषयतायांसाध्यतात्तत्रघटपृथिवीइतरेभ्योभिद्यते
इत्येवप्रतिज्ञा यत्रेतरभेदस्यसाध्यतातत्रघटपृथिव्यामितरभेदइत्येवप्रतिज्ञाइतिसाध्यप्रकारकानुमितौ
साध्यज्ञानापेक्षाभवतिचेदपिसाध्यविशेष्यकानुमितौसाध्यज्ञानापेक्षानास्तीतिभावः ८८ भवःप्रभ
वतिइतिसूत्रेकर्तरीप्सिततमंकर्मेतिसूत्रात्कर्तरीत्यस्यानुवृत्तिस्तस्यप्रभवतइत्यनेनसंबंधः कथंभवनंभः

वृ॰टी॰

प्रकाशस्तस्यकर्त्ताश्चाश्रयः तस्यप्रकाशाश्रयस्यप्रमात्राकस्यप्रभवः यस्मिन् गंगायाः संबंधात् गंगायाः
प्रभववतेः प्रथमप्रकाशः सप्रभवः नामाधिकरणं हिमवदात्मकंअपादानमित्यर्थः ८८ स्वनिष्ठास्यकर्तृक
दर्शनविषयताविरहोद्देश्यकोव्यापारः अत्रव्यापारेस्वनिष्ठास्यकर्तृकदर्शनविषयताविरहोद्देश्यकत्वंस्व
निष्ठास्यकर्तृकदर्शनविषयताविरहेच्छाप्रयोज्यत्वं यथात्तत्सुखोद्देश्यकंभोजनमित्यत्रभोजनेतत्सुखोद्देश्यक
त्वंतत्सीव्याप्तीनेच्छाविषयत्वरूपंतत्सीव्याप्यप्रयोज्यत्वं व्यापारस्तपकांतस्थितिरूपः व्यापारानुकूलत्वयोंत
र्थानघटकत्वंव्यापारविषयकेच्छाजनकत्वरूपव्यापारप्रयोजकत्वयोंतर्थानघटकत्वं ९ किंत्वष्टथत्व
रूपगुणार्थकंपरमिति परंकेवलंषष्ठ्यत्वरूपगुणार्थकंअस्मादिपदंषष्ठ्यत्वरूपगुणार्थकास्मादिपदयो
गेपंचमीत्यर्थः ९ नचपटाद्भेदस्मादौक्रियायोगादपादानपंचमेवेति अत्रपटपदोत्तरपंचम्याप्रतियो
गित्वरूपोर्थस्तस्यभेदपदघटकीभूतभिदधात्वर्थेभेदेनिरूपकत्वसंबंधेनान्वयइतिभावः ९ यद्येकप

दृश्येति अग्रमपदं त्र ९९ पित्रादीनां साहित्यावच्छिन्नानां पितृभ्यो दद्यादिति चतुर्थ्यर्थाधीनतया गोद्देश्यपञ्चकता
वोधस्य उद्देश्यगतसंख्याया विवक्षितत्वादिति भावः ९९ पितरो देवता इति तद्धितसमानार्थकदेवता
पदाधीननिरपेक्षाणां त्यागोद्देश्यतायोथापेक्षयेति अत्र देवता पितर इति वाक्ये विशेषणगतसंख्याया अ
विवक्षितत्वादिति भावः ९९ मंत्रलिंगस्य विपक्षवाधकतर्कादिसापेक्षव्याप्तिनिश्चयाधीनतयेति
साहित्यावच्छिन्नाः पितरः श्राद्धदेवताः श्राद्धार्थावाहनप्रकाशकमंत्रपदिकीभूतपितृशब्दाकारकबहु
वचनांतपदोयस्यापितृत्वादिमत्र हेतुरस्तु साध्यं साहित्याशंकायां पदिसाहित्यावच्छिन्नां श्राद्धदेवतात्वं न
स्यात् तदा श्राद्धार्थावाहनप्रकाशकमंत्रात् श्राद्धार्थसाहित्यावच्छिन्नावाहनप्रकाशनं न स्यात् अस्तिता
दृशामंत्रस्य श्राद्धार्थसाहित्यावच्छिन्नावाहनप्रकाशनसामर्थ्यरूपलिंगं अयं विपक्षवाधकस्तर्कः तत्सा
पेक्षव्याप्तिनिश्चयाधीनतया तत्सापेक्षव्याप्तिनिश्चयापेक्षत्वाद्यार इत्यर्थः तादृशव्याप्तिनिश्चये सति यत्र लिं

३

यु·टी·

3

गम्यादित्यावच्छिन्नानां श्याङ्देवतान्तर्याभोभवतीति भावः सां तं गमेन्तरं चिंतनीयं कपोतत्वसमाना
धिकरणपर्याप्तिकशतत्वविशिष्टाः कपोता इत्यर्थः सो ११ अर्थान्तरमनभिदधानाश्चेति चैत्रेणास्थीयते इत्य
त्र चैत्रकर्तृकस्थितिविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रतिभावार्थकलकारसमभिव्याहृतस्थाधात्वजन्योपस्थि
तेर्विशेष्यतासंबंधेन कारणत्वमिति भावः सो १० कर्मत्वबोधस्याप्यावश्यकतेति कर्मवत्कर्मणा तुल्यक्रि
य इति सूत्रस्य कर्मस्थया क्रियया तुल्यक्रियावत्त्वं गम्या कर्ता कर्मवत्स्यादिति नार्थः किंतु कर्मस्थया क्रियया
तुल्यक्रियालकारविवक्षितकर्मत्वविशिष्टा कर्ता कर्मवत्स्यादित्यर्थः इति भावः सो १० कर्मत्वविवक्षाया
मपि कर्तृत्वविवक्षणे इत्यादिः पच्यंते माषा इत्यत्र माषाणां स्वतंत्रः कर्ता इत्यनेन कर्तृसंज्ञावकाशात्कर्तरीति सि
तत्तर्मकर्मेत्यनेन कर्मसंज्ञा च वक्तव्या तयोः समावेशस्यानेकजशसमूहालंबनात्मकमेव विशेष्यताद्वय
निरूपकमेव सो १० कर्तृत्वसंबंधमध्येप्रवेशेति इति शाब्दबोधः इति भावः ११ प्रातिपदिकार्थवि

शेषणतयैवकर्तृत्वेऽविवक्षितेइतीत्यस्यप्रातिपदिकार्थविशेष्यतयाकर्तृत्वविवक्षाभावविशिष्टाया
प्रातिपदिकार्थविशेषणतयाकर्तृत्वविवक्षातदभावेसतितदन्तं तृतीयेत्यर्थः १९ अवधारणाव
रतयेति पूर्ववाक्यस्यावधारणपरतयेत्यर्थः तस्येतिपर्यवसितमित्यनेनान्वयः सो ११ चैत्रेणापक्व
वान्मैत्रइति अत्रचैत्रकर्तृकपाककर्तृत्वविशिष्टोमैत्रइतिशाब्दबोधइतिभावः १२ मीमांसकानामि
ति इत्याहुरित्यनेनान्वयः १२ यत्रलघुगुरुरूपाभ्यामिति यथाशुक्लशब्देशुक्लंरूपमित्यत्रलघु
रूपेणबोधःशुक्लोघटइत्यत्रगुरुरूपेणबोधोनिर्विवादस्तत्रैवगुणेशक्तिर्गुणिनिलक्षणेत्यर्थः १२
गौरवादिति व्यापारत्वावच्छिन्नेऽन्नादितात्पर्यन्तमयमतेसमानमितिभावः १२ बीजादीनामङ्कुरः
कृतइत्यादाविति बीजइतिव्यापारजन्यताविशिष्टाङ्कुरइत्यर्थः १२ यत्नाविनाभूतेति पचतीति
वाक्यस्याकयत्नोवर्तमानइत्याकारकोबोधोऽर्थाध्याहारमतेइत्यर्थः १२ निराकांक्षेतिपचतियत्न

बु·टी· ५

इत्याकारकवाक्यात्पाकयत्नोवर्तमानइत्याकारकबोधप्रसंगइत्यर्थः १२ परस्परसाकांक्षेति यथादेवद
त्तःपीनइत्यत्रपरस्परसापेक्षदेवदत्तपीनपदार्थयोरन्वयबोधेएवाध्याहृतस्यरात्रिभोजनस्यविषयतातैः
स्वीक्रियतेतथापिधानमित्यत्रापिपरस्परसाकांक्षपिधानाम् पदार्थयोरन्वयबोधेएवनिराकांक्षपदात्
द्वारमितिसाकारकादुपस्थितस्यार्थस्यद्वारकर्मकत्वरूपस्यविषयतातैःस्वीक्रियतेइत्यर्थः सं १२ प्रकृते
चेति पचतियत्नइत्यत्रान्वयबोधस्यपाकयत्नोवर्तमानइत्याकारकस्यसाकांक्षत्वानुपयोगिपदार्थस्ययत्न
रूपस्यान्वयविषयकत्वेनेत्यर्थः सं १२ तात्पर्यलिंगेनेतियत्नत्वावच्छिन्नोवर्तमानस्यविषयीभूतपाकोप
पादकत्वसंबंधेनतात्पर्यवत्वादित्यर्थः तात्पर्यंचपाकानुकूलोव्यापारःप्रेरणारूपइत्यर्थः १३ ईश्वरकृ
तेरिति कृतिर्द्विविधानित्याअनित्याच ईश्वरस्यनित्याजीवस्यानित्या अनित्यायाकृतिस्तस्यामेवेष्टसाध
नतात्वानादिजन्यतावच्छेदकतयासिद्धायाप्रवृत्तित्वादिरूपाजातिःसास्वीक्रियतेनतुईश्वरकृताविति

भावः ९४ तद्विषयात्रशिष्टेतिप्रातिपदिकार्थमात्ररूपो यो विषयस्तस्मिन्नत्रशिष्टा विहितेत्यर्थः ९५
अधिकरणानां निवेश इति प्रतिबंधकतायाः आख्यातजन्याश्रयत्वोपस्थित्यादिरूपमधिकरणमिति
भावः ९५ यत्रतिवादेरिति पचतिलइत्याकारकस्थले इत्यर्थः ९६ उक्तरीत्येति पटादिपदेष्वपि
पुरुषविशेषीयसंकेतसंबंधेन शाब्दान्तरस्य शक्ततावच्छेदकतापत्तेरित्यर्थः ९७ चैत्रे चैत्रान्यसमवे
तेऽस्ति चैत्रे चैत्रसमवेतक्रियाजन्यसंयोगस्य सत्वेऽपि चैत्रान्यसमवेतक्रियाजन्यसंयोगस्यासत्वाच्चैत्रा
न्यसमवेतक्रियाजन्यसंयोगाभावस्य च सत्वाच्चैत्रेण न गम्यते चैत्र इत्याकारकप्रयोगस्यानुपपत्तिर्ना
स्तीत्यर्थः चैत्रेण गम्यते ग्राम इत्यादिस्थले चैत्रसमवेतक्रियाजन्यसंयोगविशिष्टः सामान्यसमवेत
क्रियाजन्यसंयोगविशिष्टो ग्राम इत्याकारकः शाब्दबोधः क्रियायाः फलस्य च द्विधा भानमिति भावः
९८ यागमिप्रभृतीनामिव त्यजिगमिप्रभृतीनामपि पर्यायतेति भ्रमदशायामिति यथा याग

५

मु.टी.

5

मित्रभृतीनांसंयोगजनकत्वोपलक्षितव्यापारवाचकतारूपपर्यायतात्रतिष्ठमदशायामित्यर्थः १८ त्यजति
गच्छतीत्यादितोपीति ग्रामंत्यजतिदेवदत्तइत्यतोपिग्रामनिष्ठसंयोगजनकव्यापारानुकूलकृतिमान्देवदत्त
इतिशाब्दबोधस्यग्रामंगच्छतिदेवदत्तइत्यतोपिग्रामनिष्ठसंयोगजनकव्यापारानुकूलकृतिमान्देवदत्त
इतिशाब्दबोधस्यचोत्पत्तेरित्यर्थः १८ क्रियारंभात्पूर्वमिति क्रियानुकूलकृतेःपूर्वमित्यर्थः १८ कर्म
समाप्त्युत्तरमिति चरमक्रियोत्तरमित्यर्थः १८ तत्क्रियारंभपूर्वमपीति तत्क्रियानुकूलकृतेःपूर्वम
पिविद्यमानस्यतत्क्रियानुकूलकृत्यधिकरणकालस्यघटिकाचतुष्टयात्मकस्यस्वबृत्तिप्रागभावाप्र
तियोगित्वंप्रथमकृतौनास्त्येवेतिस्वबृत्तिप्रागभावाप्रतियोगित्वस्वबृत्तिध्वंसाप्रतियोगिप्रकृतक्रियाक
र्तृनिष्ठत्वाभ्यांविशेषितस्याभिधेयतासंबंधोवा एवंचरमक्रियोत्तरमपिविद्यमानस्यतत्क्रियानुकूलकृत्य
धिकरणकालस्यघटिकाचतुष्टयात्मकस्यस्वबृत्तिध्वंसाप्रतियोगिप्रकृतक्रियाकर्तृनिष्ठत्वंप्रथमकृतौ

नास्त्येवेतिस्ववृत्तिप्रागभावाप्रतियोगित्वस्ववृत्तिध्वंसाप्रतियोगिप्रकृतक्रियाकर्तृत्वनिष्ठत्वं प्रथमकृतैनास्
त्येवेति ताभ्यां विशेषिताधेयतासंबंधो वाधित इति न तादृशकालमादाय चैत्रः पचतीतिप्रयोगाप
त्तिरित्यर्थः १८ अप्रसिद्धो वेतीति प्रथमकृतौ एतादृशस्थूलकालस्य स्ववृत्तिप्रागभावाप्रतियोगि
त्वमस्ति चेदपि स्ववृत्तिध्वंसाप्रतियोगिप्रकृतक्रियाकर्तृत्वनिष्ठत्वं नास्त्येवेति ताभ्यां विशेषिताधेयता
संबंधोऽप्रसिद्धो वेत्यर्थः १८ संबंधे स्वपदार्थस्य विशिष्यनिवेशेप्युपपत्तिसिद्धिं सेति संबंधे स्वस्वस्यवि
शेषणतया न प्रवेशः किंत्वुपलक्षणतयेति न दोष इति भावः अत्र पाकानुकूलकृत्यधिकरणकाल
स्य घटिकाचतुष्टयात्मकस्य स्ववृत्तिप्रागभावाप्रतियोगित्वस्ववृत्तिध्वंसाप्रतियोगिप्रकृतक्रियाक
र्तृत्वनिष्ठताभ्यां विशेषिताधेयतासंबंधो विक्लित्यनुकूलव्यापारानुकूलप्रथमकृतावस्त्येवेति ता
दृशविशिष्टाधेयतासंबंधेन घटिकाचतुष्टयात्मकवर्तमानकालविशिष्टपाकानुकूलप्रथमकृ
तिर्भवत्येवेति तादृशकृतिमादाय पचतीतिप्रयोगस्योपपत्तिरिति निष्कर्षः १९ कश्चित्प्रतियोग्य

८

6

सु॰टी॰

प्रसिद्धेर्देवदत्तादिति यत्रदेवदत्तेनपाकोनैवकृतस्तत्रापिनपचतिदेवदत्तइतिप्रयोगोभवतितत्रतत्त्वा
वच्छिन्नपाकानुकूलकृतेरभावविशिष्टेदेवदत्तइतिशाब्दबोधोवक्तव्यः तत्रतत्त्वेनावच्छिन्नपाकानुकू
लकृतिरूपप्रतियोग्यप्रसिद्ध्याशाब्दबोधस्यानुपपत्तिरित्यर्थः ॥ यत्किंचित्पाकानुकूलायकृतित्वावच्छे
देनेति यत्किंचित्पाकानुकूलायकृतित्वसामानाधिकरण्येनतदन्वयइत्यर्थःयत्रचैत्रमैत्रोभयकर्तृक
पकःपाकोस्तितंचैत्रःकरोतिमैत्रःकरिष्यतितत्रचैत्रःपचतिमैत्रःपक्ष्यतिइतिप्रयोगोभवतिचैत्रमैत्रोप
स्यतइतिप्रयोगोनभवतितस्यापत्तिःमैत्रीययत्किंचित्पाकानुकूलायकृतौवर्तमानप्रागभावप्रतियोगि
त्वरूपभविष्यत्वसत्त्वात् तादृशकृतित्वावच्छेदेनतदन्वयइत्यर्थःचैत्रीयतादृशकृतौतदभावान्नापत्तिरिति
भावः ॥ अन्यथेति अभावेऽनागतकालावच्छिन्नत्वस्याभानेइत्यर्थः ॥ वर्तमानत्वस्यपाककृत्यभाव
मादायेति वर्तमानकालेवृत्तौविद्यमानोयःपाकानुकूलकृत्यभावस्तमादायेत्यर्थः ॥ उक्तप्रक्रेत्यादि
श्वःपक्ष्यतिनपक्ष्यत्यत्रानागतकालावच्छिन्नत्वस्याभावेऽभा[illegible]ः पक्षद्वयेपिपाकानुकूलकृतेरनागत

नातीतकालावच्छिन्नाभावमादायनपक्केतिप्रयोगप्रसंगेनलटोऽनागतत्वार्थत्वंमावश्यकंयथेत्यर्थः
॥१॥ अद्यतनानागतकालावच्छिन्नपाककृत्यभावमादायेति पाकानुकूलकृतेरद्यतनानागतकाला
वच्छिन्नयोः भावस्त्वमादायेत्यर्थः ॥१॥ उक्तरीत्याऽतिप्रसंगवारणायेतिपाकानुकूलानद्यतनामागत
कालावच्छिन्नकृतिविशिष्टरूपेपक्ष्यर्थपिपाकानुकूलकृतेरनद्यतनानागतयत्किंचित्कालावच्छिन्नाभा
वमादायनपक्ष्येतिप्रयोगप्रसंगवारणायेत्यर्थः ॥१२ मध्यदशायामपाक्षीदित्यादिप्रयोगवारणायुक्त
रीत्याबोध्यमिति लङर्थस्यवर्त्तमानध्वंसस्यस्वविशिष्टकालवृत्तिकृतिजन्यव्यापाराधीनफलानुकूल
व्यापारानुकूलत्वविशिष्टप्रतियोगितासंबंधेनपूर्वकृतावन्वयोवक्तव्यः पूर्वकृतौवर्तमानध्वंसस्य
दर्शितविशिष्टसंबंधासत्वेनमध्यदशायामपाक्षीदित्यादिप्रयोगविरहइत्यर्थः ॥१२ अपरोक्षतायाम
पिलिटःसाधुत्वेऽइति परोक्षत्वेलिटःप्रथमपुरुषमध्यमपुरुषयोःसाधुत्वेऽपरोक्षत्वेलिडुत्तमपुरुषस्य
चेत्तदाणल्उत्तमोवेत्यादिसूत्रव्यर्थमेवेत्यर्थः ॥१२ अन्यथेति वक्तुःसाक्षात्कारविषयत्वस्यपरोक्षत्वक्

वु॰टी॰

पदे ॥ निद्रादिदशायां स्वकर्तृकगमनादिक्रियायाः स्वपरोक्षत्वसंभवेनेति तथाहं ग्रामं जगाम इति प्रयोग
स्यापरोक्षत्वेपि संभवेनापरोक्षत्वे लिडुत्तमपुरुषस्य साधुत्वे णलुत्तमो वेत्यादेर्ज्ञापकत्वासंगतिरिति भावः ॥
स्वर्गत्वावच्छिन्नेन समभिव्याहृतेनेति स्वर्गत्वावच्छिन्नः समभिव्याहृतपदोपस्थापितकामनाविषय इति ज्ञान
सहकृतस्य समभिव्याहृतपदोपस्थापितकामनाविषयत्वावच्छिन्नसाधनत्वं लिङ्पदशक्यमिति ज्ञानस्य
मर्थः ॥ स्वर्गत्वादेः शाब्दविशेषणत्वेपि स्वर्गत्वादेर्वैजात्यावच्छिन्नविशेषणत्वेपीत्यर्थः ॥ तदुपलक्षितवैजा
त्यावच्छिन्ननिरूपितजनकतायाः स्वर्गत्वोपलक्षितं यद्वैजात्यावच्छिन्नं तन्निरूपितजनकताया अभावाद्व
क्तित्वावच्छिन्ननिरूपितव्यक्तिसाधनताविशिष्टत्वणमिति ज्ञानाभावात्तद्वृत्त्यनुपपत्तिरिति भावः ॥
भूयः स्वत्वोर्थिनामपीति तत्र भूयस्त्वावच्छिन्नस्वत्वं प्रतिक्रियाविशेषस्येनकारणताया अभावाद्भूयस्त्वाव
च्छिन्ननिरूपितस्वत्वसाधनताविशिष्टः क्रियाविशेष इति ज्ञानाभावात्तद्वृत्त्यनुपपत्तिरिति भावः ॥ त
द्धर्मप्रकारेणेत्यादीति तद्धर्मप्रकारेणाभासमानं यत्फलं यथा विजातीयो व्यक्तिरित्यत्र व्यक्तित्वेनभासमा

नेफलं वैजात्यावच्छिन्नं तत्फलं प्रतिसाधनताज्ञानं यत् यथा वैजात्यावच्छिन्ननिरूपितसाधनताविशिष्टं त
णमिति ज्ञानं तज्ज्ञानस्यैव प्रवर्तकत्वादित्यर्थः ॥१३॥ न हि वह्नित्वादिकं तरणादिजन्यतावच्छेदकमिति
वह्नित्वोपलक्षितवैजात्यावच्छिन्ननिरूपितसाधनताविशिष्टत्वेनेति ज्ञानस्यैव प्रवर्तकत्वमिति भा
वः ॥१४॥ व्यापकताघटके स्यादीति वैजात्यावच्छिन्नव्यापकताभानेन व्यापकताघटकाभावप्रतियोगि
तायामवच्छेदककोटौ स्वरूपतः प्रविष्टायामपि जातेः स्वर्गधर्मत्वादिना भानेन बाधकमित्यर्थः ॥
व्यापकताघटकाभावप्रतियोगितावच्छेदककोटाविति वैजात्यावच्छिन्नाव्यवहितपूर्वकालावच्छे
देन वैजात्यावच्छिन्नाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावविशिष्टधर्मवत्त्वरूपा तद्घटकी
भूतोऽभावो वैजात्यावच्छिन्नाव्यवहितपूर्वकालावच्छिन्नवैजात्यावच्छिन्नाधिकरणनिष्ठाभावप्रतियो
गितावच्छेदकत्वाभावस्तत्प्रतियोगितावच्छेदकं वैजात्यावच्छिन्नाव्यवहितपूर्वकालावच्छिन्नवैजा
त्यावच्छिन्नाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वं तत्कोटौ प्रविष्टमित्यर्थः ॥१४॥ अत एव प्रति

वृ.टी.

योगितासंबंधेनप्रतियोगिप्रकारकज्ञानेप्रतियोगिकोप्यत्रउपलक्षणप्रकाराभाननियमादेवेत्यर्थः ॥८ एवं
यत्प्रकारतावच्छेदकधर्मोप्यनुपस्थितइतियत्प्रकारतावच्छेदकधर्मस्यज्योतिशोभनत्वादेरुपस्थितिस्तत्रैव
तदवच्छिन्ननिरूपितनियतोन्तर्वर्तितावच्छेदकधर्मवत्संसर्गकत्वरूपकारणत्वस्यग्रहेभविष्यतीतिभावः
॥८ उक्तरीत्येति व्यापकताघटकाभावप्रतियोगितावच्छेदककोटिप्रविष्टेनापिसंसर्गधर्मत्वेनोपलक्षणी
भूतेनजात्यस्यभानेनेत्यर्थः ॥५ संबंधसंकोचेइति विजातीयसंसर्गप्रतियोगिकसमवायस्यसंसर्गत्वेइ
त्यर्थः ॥५ विजातीयसंसर्गवत्विशिष्टाभावप्रतियोगितात्वस्यागुरोरिति अत्रशुद्धसमवायस्यवैजात्यस्यचप्र
वेशेनलघुत्वमितिभावः ॥५ विजातीयसंसर्गायिसमवायसंबंधेनप्रमेयवत्विशिष्टाभावप्रतियोगितात्वरू
पगुरुधर्मेति अत्रविजातीयसंसर्गप्रतियोगिकसमवायस्यप्रमाविषयत्वरूपप्रमेयत्वस्यचनिवेशेनगुरुत्व
मितिभावः ॥५ अवच्छेदकताघटकसमवायसंबंधसंकोचेनेति विजातीयसंसर्गानुयोगिकसमवाय
स्यसंसर्गतेत्यर्थः ॥८ नरकानुत्पादस्यतत्प्रागभावात्मकस्यप्रतियोगिविकस्यसामेनफलत्वासंभवा

दिति नरकोत्पादसत्त्वेन नरकप्रागभावः स्वीक्रियते नरकोत्पादासत्त्वेन नरकप्रागभावः स्वीक्रियते यदि न
रकोत्पादसत्त्वेन नरकप्रागभावः स्वीक्रियते तर्ह्युच्यते तदा येन प्रायश्चित्तं संध्यावंदनादिकं च कृतं तस्य
नरकोत्पादो नास्त्येवेति नरकप्रागभावस्य स्वीकारे प्रयोजनं नास्तीति नरकप्रागभावस्य फलत्वं न संभव
ति यदि नरकोत्पादासत्त्वेन नरकप्रागभावा स्वीक्रियते तर्ह्युच्यते तदा प्रायश्चित्तात्संध्यावंदनादेश्च सर्वम
पि नरकप्रागभावोऽस्त्येवेति नरकप्रागभावस्य फलत्वं न संभवतीत्यर्थः ११९ तदात्मनिग्रसत्त्वात् नि
त्यत्वेन चोभयोः फलत्वासंभवादिति तदात्मनिग्रसत्त्वात् फलत्वासंभवात् नित्यत्वेन चोभयोः फलत्वासं
भवादित्यर्थः ११९ ह्येमसाधारणसाधनतायाश्चगुरुशरीरत्वेनेति प्रमध्यासिद्धिनिरूपकतानव
च्छेदकनियतोत्तरवर्तितावच्छेदकधर्मवत्त्वरूपायाश्चगुरुशरीरत्वेनेत्यर्थः ११९ मंडलीकरणादि
जन्यनर्ददेशादिरूपेफलेपीति मंडलीकरणं द्वितीयक्रियातज्जन्यैतद्देशादिरूपफलेपि प्रथमक्रियायां
समरूपेफलेपीत्यर्थः ११२ स्वर्गासाधनत्वं न स्वर्गकामनाधीनकृतिसाध्यमितिजनितबाधबलादिति स्वर्गका

१

स्वु·टी·

मोयजेतेतिवाक्यान्नादृशाबाधवलात्स्वर्गकृतिसाध्यताविशिष्टस्वर्गसाधनयागात्रकूलकृतिविशिष्टःस्वर्गकाम
इतिशाब्दबोधोभवतीतिभावः ॥ व्युत्पत्तिवैचित्र्येणेतिविशेष्यतासंबंधेनक्रियाप्रकारकशाब्दबुद्धित्वावछिन्नंप्र
तिशब्दसमभिव्याहृताख्यातजन्योपस्थितेर्विशेष्यतासंबंधेनकारणत्वं प्रकारतासंबंधेनक्रियाविशेष्यकशाब्द
बुद्धित्वावछिन्नंप्रतिसौयुत्सुसमभिव्याहृताख्यातजन्योपस्थितेर्विशेष्यतासंबंधेनकारणत्वंतयोर्भेदेनेत्यर्थः ॥
आख्यातार्थस्यैवकृतेःकर्मप्रत्ययस्थलेक्रियाविशेषणतयाभानमिति प्रकारतासंबंधेनक्रियाविशेष्यकशाब्द
बुद्धित्वावछिन्नंप्रतियगुत्ससमभिव्याहृताख्यातजन्योपस्थितेर्विशेष्यतासंबंधेनकारणत्वमितिभावः ॥ लौकि
कप्रमाणादेव अवगमानादेरेवेत्यर्थः ॥ कृतिसाध्यताबोधइति तथाचस्वर्गकामोयजेतेत्यत्रविधिप्रत्ययस्यकृ
तिसाध्यत्वंनार्थइतिभावः ॥ ततद्धर्मप्रकारेणेमादि इष्टसाधनतात्वेनेष्टसाधनताविषयकशाब्दबोधेइष्टसाध
नतात्वेष्यकारतावच्छेदकतापर्याप्त्यवगाहित्वानस्येहेत्वतादित्यर्थः ॥ विशिष्टस्वर्गादिवाचकस्वर्गादिपदादिति
ङःत्वासंभिन्नत्वविशिष्टस्वत्ववाचकस्वर्गादिपदादित्यर्थः ॥ केवलस्वत्वनादिनास्वर्गादिरूपस्वत्वबोधइति केवल

स्वत्वनादिना दुःखासंभिन्नत्वविशिष्टसुखस्य बोधः इत्यर्थः ।१८ तत्रानिर्वाह एवेति यथा केवलसुखत्वेन दुःखासंभिन्न
त्वविशिष्टसुखस्य बोधः स्वर्गादिपदादिष्टः तथा केवलेष्टसाधनतात्वेन बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाध
नत्वस्य बोधो विधिप्रत्ययादिष्टः तथा च श्येनेनैव वैरिवधसाधनत्वस्य सत्त्वेऽपि बलवदनिष्टाननुबन्धित्वविशिष्टवैरिवधसा
धनत्वस्याभावात्तत्र तस्य केवलेष्टसाधनतात्वेनापि बोध इति भावः ।१९ न त्वेकदेशादि एककालावच्छेदेनैकस्मि
न्पुरुषे वर्तमानयोः श्येनजन्यवैरिवधगोचरप्रबलकामनायाः श्येनजन्यनरकविषयकबलवद्द्वेषयोरेकतरं श्येन
जन्यनरकविषयकबलवद्द्वेषः अपरं विशिष्टेच्छेति श्येनजन्यवैरिवधगोचरप्रबलकामनाविशिष्टेच्छेति नेत्य
र्थः एककालावच्छेदेनैकस्मिन्पुरुषे वर्तमानयोः वैरिवधगोचरसामान्यकामनानरकविषयकबलवद्द्वे
षयोरेकतरं नरकविषयकबलवद्द्वेषः अपरं विशिष्टेच्छेति वैरिवधगोचरसामान्यकामनाविशिष्टेच्छेति भव
त्येवेति वैरिवधगोचरसामान्यकामनाविशिष्टेच्छेति बलवद्द्वेषविषयदुःखजनकत्वस्य श्येने सत्त्वात्तत्र बलवदनिष्टा
साधनत्वस्याभानं समीचीनमेवेति भावः २० बलवद्द्वेषविषयदुःखजनकत्वप्रतियोगिकाभावस्यातिप्रसक्ततयेति

१०

10

बृ·टी

यदाशपेनजन्मवैरिविषये प्रबलकामनावर्त्तते तदाशपेनजन्मनरके बलवद्द्वेषो न भवति चेदपि खड्गप्रहारादिरूपकल्पितक
र्मजन्यराजताडनाधीनदुःखे बलवद्द्वेषो भवत्येव तत्र खड्गप्रहारादिरूपकल्पितकर्मजन्यराजताडनाधीनदुःखे बल
वद्द्वेषो भवत्येव तत्र खड्गप्रहारादिरूपकल्पितकर्मणि विशिष्टाभावस्य भयाभावं चादाय बलवद्द्वेषविषयदुःख
जनकत्वप्रतियोगिकाभावोस्ति प्रवृत्तिर्न भवतीति कृत्वा बलवद्द्वेषविषयदुःखजनकत्वप्रतियोगिकाभावस्या
तिप्रसक्तत्वमिति भावः ॥ प्रकृष्टविशेषीय बलवद्द्वेषविषयदुःखजनकत्वाभावस्येति वैरिविषयगोचरप्रबल
कामनाविशिष्टत्वे सति बलवद्द्वेषविषयदुःखजनकतानवच्छिन्नप्रतियोगिताकाभावस्येत्यर्थः ॥ प्रसक्त्यासंभवादिति वैरि
विषयगोचरप्रबलकामनाविशिष्टप्रकृष्टान्तर्भावेनासंभवादिति भावः ॥ तादृशदुःखजनकत्वेऽभावे च खड्गशक्ति
स्वीकार इति इदानीं तादृशदुःखजनकत्वप्रतियोगिकाभावस्यापि निवेशो नास्ति जनकत्वसामान्याभावस्यापि निवे
शो नास्ति किं त्वभिचरन्निति पदसमभिव्याहारबलात् वैरिविषयगोचरप्रबलकामनाविशिष्टत्वे सति बलवद्द्वेषविषय
दुःखजनकतानवच्छिन्नप्रतियोगिताकाभावरूपविशेषाभावस्य निवेशोस्तीति न कश्चिद्दोष इति भावः ॥